## वसतिक्षुधोरिट्। (५२/३०४६)

वसतेः क्षुधेश्च क्त्वानिष्ठयोः इडागमः भवति। उषित्वा। उषितः। उषितवान्। क्षुधित्वा। क्षुधितः। क्षुधितवान्। वसति इति विकरणो निर्देशार्थ एव। वस्तेस्तूदात्तत्वादेव भवितव्यमिटा। [1]पुनरिड्ग्रहणं नित्यार्थम्॥

## अञ्चेः पूजायाम्। (५३/३०४७)

अञ्चेः[2] पूजायामर्थे क्त्वानिष्ठयोः इडागमो भवति। अञ्चित्वा जानु[3] जुहोति। अञ्चिता अस्य गुरवः। 'उदितो वा' (७. २. ५६/३३२८) इति क्त्वाप्रत्यये विकल्पः प्राप्तः, निष्ठायाम् 'यस्य विभाषा' (७.२.१५/३०२५) इति प्रतिषेधः प्राप्तः, [4]तदर्थमिदं प्रारब्धम्। पूजायाम् इति किम्? उदक्तमुदकं कूपात्। [5]उद्धृतम् इत्यर्थः॥

## लुभो विमोहने। (५४/३०४८)

लुभो विमोहनेऽर्थे वर्तमानात् क्त्वानिष्ठयोः[6] इडागमो भवति। लुभित्वा, लोभित्वा। [7]विलुभिताः केशाः। [8]विलुभितः सीमन्तः। विलुभितानि पदानि। विमोहनम् आकुलीकरणम्, तत्र क्त्वायां 'तीषसहलुभरुषरिषः' (७. २. ४८/२३४०) इति विकल्पः, निष्ठायाम् 'यस्य विभाषा' (७. २. १५/३०२५) इति [9]प्रतिषेधः [10]प्राप्तः। विमोहने इति किम्? लुब्धो वृषलः[11]। [12]शीतेन पीडितः इत्यर्थः। [13]लुब्ध्वा, लुभित्वा, लोभित्वा। गार्ध्ये यथाप्राप्तमेव भवति॥

## जॄव्रश्च्योः क्त्वि। (५५/३३२७)

जॄ व्रश्चि इत्येतयोः क्त्वाप्रत्यये[14] इडागमो भवति। जरित्वा, जरीत्वा। व्रश्चित्वा। जॄ इत्येतस्य 'श्र्युकः किति' (७. २. ११/२३८१) इति प्रतिषेधः प्राप्तः, व्रश्चेरुदित्वाद् विकल्पः[15]। क्त्वाग्रहणं निष्ठानिवृत्त्यर्थम्॥

## उदितो वा। (५६/३३२८)

उदितो धातोः क्त्वाप्रत्यये परतो वा इडागमो भवति। शमु – शमित्वा, शान्त्वा। तमु – तमित्वा, तान्त्वा। दमु – दमित्वा, दान्त्वा[16]॥

---

1. इट् इत्यनुवर्तमाने पुनरिड्ग्रहणं विकल्पार्थनिवृत्त्यर्थम् क. 2. धातोः इत्यधिकम् क. ब. 3. जुहोति नास्ति क. 4. नित्यार्थं वचनम् ब. ड. 5. उद्धृतमित्यर्थः नास्ति ब. इ. 6. परतः इत्यधिकम् क. 7. लुभिताः क. 8. लुभितः क. 9. इट्प्रतिषेधः ह, निषेधे प्राप्ते वचनम् ब, प्रतिषेधे प्राप्ते वचनम् ड. 10. नास्ति क. 11. गर्धेन बाधितः इत्यर्थः इत्यधिकम् ह, लुब्धा वृषली इत्यधिकम् क. 12. वाक्यमिदं नास्ति ब. क. इ. 13. लुब्ध्वा नास्ति क. 14. परतः इत्यधिकम् क. 15. प्राप्नोति इत्यधिकम् क. 16. भ्रमु – भ्रमित्वा भ्रान्त्वा। क्षमु– क्षमित्वा क्षान्त्वा इत्यधिकम् ब. इ.